## सुन्दरकाण्ड एकत्रिंशः सर्गः (३१) - श्रीराम वृत्तान्त कथनम्

एवं बहुविधां चिन्तां चिन्तयित्वा महाकपिः ।
संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ १ ॥

राजा दशरथो नाम रथ कुञ्जर वाजिमान् ।
पुण्यशीलो महाकीर्ति ऋजुरासीन् महायशाः ॥ २ ॥

राजर्षीणां गुणश्रेष्ठस् तपसा चर्षिभिः समः ।
चक्रवर्ति कुले जातः पुरन्दर समो बले ॥ ३ ॥

अहिंसा रतिर क्षुद्रो घृणी सत्य पराक्रमः ।
मुख्यश् चेक्ष्वाकु वंशस्य लक्ष्मीवाँल् लक्ष्मिवर्धनः ॥ ४ ॥

पार्थिव व्यञ्जनैर् युक्तः पृथुश्रीः पार्थिवर्षभः ।
पृथिव्यां चतुरन्तायां विश्रुतः सुखदः सुखी ॥ ५ ॥

तस्य पुत्रः प्रियो ज्येष्ठस् ताराधिप निभाननः ।
रामो नाम विशेषज्ञः श्रेष्ठः सर्व धनुष्मताम् ॥ ६ ॥

रक्षिता स्वस्य वृत्तस्य स्वजनस्य च रक्षिता ।
रक्षिता जीवलोकस्य धर्मस्य च परन्तपः ॥ ७ ॥

तस्य सत्याभिसन्धस्य वृद्धस्य वचनात् पितुः ।
सभार्यः सह च भ्रात्रा वीरः प्रव्राजितो वनम् ॥ ८ ॥

तेन तत्र महारण्ये मृगयां परिधावता ।
राक्षसा निहताः शूरा बहवः कामरूपिणः ॥ ९ ॥

जनस्थान वधं श्रुत्वा हतौ च खरदूषणौ ।
ततस्त्व मर्षाप हृता जानकी रावणेन तु ॥ १० ॥

वञ्चयित्वा वने रामं मृग रूपेण मायया ।
स मार्गमाणस् तां देवीं रामः सीता मनिन्दिताम् ॥ ११ ॥

आससाद वने मित्रं सुग्रीवं नाम वानरम् ।
ततः स वालिनं हत्वा रामः परपुरञ्जयः ॥ १२ ॥

प्रायच्छत् कपि राज्यं तत् सुग्रीवाय महाबलः ।
सुग्रीवेणापि सन्दिष्टा हरयः काम रूपिणः ॥ १३ ॥

दिक्षु सर्वासु तां देवीं विचिन्वन्ति सहस्रशः ।
अहं सम्पाति वचनाच् छत योजन मायतम् ॥ १४ ॥

अस्या हेतोर् विशालाक्ष्याः सागरं वेगवान्प्लुतः ।
यथारूपां यथावर्णां यथालक्ष्मीं च निश्चिताम् ॥ १५ ॥

अश्रौषं राघवस्याहं सेय मासादिता मया ।
विर रामैव मुक्त्वाऽसौ वाचं वानर पुङ्गवः ॥ १६ ॥

जानकी चापि तच्छ्रुत्वा विस्मयं परमं गता ।
ततः सा वक्र केशान्ता सुकेशी केशसंवृतम् ।
उन्नम्य वदनं भीरुः शिंशुपा वृक्ष मैक्षत ॥ १७ ॥

निशम्य सीता वचनं कपेश्च
दिशश्च सर्वाः प्रदिशश्च वीक्ष्य ।
स्वयं प्रहर्षं परमं जगाम
सर्वात्मना राम मनुस्मरन्ती ॥ १८ ॥

सा तिर्य गूर्ध्वं च तथाप्यधस्तान्
निरी क्षमाणा तमचिन्त्य बुद्धिम् ।
ददर्श पिङ्गाधिपते रमात्यं
वातात्मजं सूर्य मिवोदयस्थम् ॥ १९ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥